स्वप्रकाशत्वेन कथमागमगम्यः स्वरूपेण स्वप्रकाशत्वेऽप्यौपाधिकरूपेण भावात्तेनानिष्प्रमाणापेक्षा
णादागमवेद्यत्वेन विरुध्यते तमादिप्रकाशवेदनावौपाधिकरूपमात्मनः स्वप्रकाशत्वबोधकेनाग

मेनावेद्यत्वइतिवत्तव्ये। आरात्वदनीप्रकृत्यनुयाग्रहकमनुमानं वदर्शयितुमापातिकां करोति किं चास्ति
नावदित्यादिना ननु किमित्यतन्त्र आह नत्वेदमिति ननु यो विशिष्टप्रकाशः स विशेषणप्रकाशाधीनो
यथा दंडीत्यादावित्यनेनाभेदमनुकूलमित्यस्यापि ज्ञानस्यापि विशिष्टप्रकाशत्वाद्विशेषणज्ञानाप्र
काशाधीनत्वमात्रं सिद्ध्यतीति ननु विशेषणज्ञानप्रकाशस्यैव तत्त्वमित्याशंक्य परिशेषात्सिद्धमित्या
ह अवच्छेदकस्यापिमित्यादिना अनुकूलमित्यत्र कस्येत्याकांक्षायां ममेत्यात्मावच्छेदको विशेषणान्त
तः प्रतीयते सत्त्वाश्च पायाज्ञानलक्षणा वृत्तिस्तया व्याप्तत्वस्य विषयो न विज्ञानादिनीत्यर्थः । मानन्तला
नसम्बन्धस्य गम्यत्वात्मा युगपदेकस्याक्रियायां कर्तृत्वकर्मत्वविरोधः तथापि विषयसंविदधीनासिं
द्धिको न विषयीत्याह अप्रत्ताकार विषयसंवेदनादेवेति परिहरति नैवमित्यादिना घटादाययनेकां ॥३५
तिकत्वपरिहाराय अहं संविदक्रमताम तैरणेति उपसंहरति अतः परिशेषादिति प्रसक्त्याति

न्यत्राप्रसंगात् लिङ्गप्रमाणोर्संभवयः परिशेषः । एतद्क्तं न वर्तते इति विवक्षितत्वात्प्रकाशः अन्यथा मयेदं विदितम्
वहारासंभवप्रसंगात् संमानस्य प्रत्यक्षसिद्धेनापि विषयसंवित्तिबंधने नचानुमानिकोऽपरोक्षो व्यवहारसम्या
न्नच चात्मा वाधमनावोन्न चान्यजन्यत्वं तरमत्ति तस्मात्स्वत एवेति पूर्वं सर्वानुमतिसाधनरूपेण परिशेषानु
मानानुस्वप्रकाशत्वं साधितमिदानीं प्रातः करं प्रत्यन्यथा वाचनीयमित्याह यदेति किं वस्य प्रकाशविज्ञाना
ति न्न आत्मा स्वप्रकाशो हलाविपत्या हविज्ञानरूपत्वाय नित्यादिनाय द्विविज्ञानस्यस्वप्रकाशत्वं सिद्धस्यात्र
तत्त्वमित्यत्र आत्मा स्वप्रकाश इति वक्तुं शक्येत तदेव नास्तीति नैयायिकमन्यस्योदयतीति विज्ञानमेवा
वेदितिपरिहरतीति अत्र साधनस्यौकत्वादिना समाधान यत्कालोपपत्युपगोचरज्ञानस्य तत्र थोक्ते तस्य
ज्ञानिनः स्विविग्रहः । स्वरात्ननत्वधर्मिणी घटादिसंविद्व्यतेन्तो कथ्यावच्छेविमतात्विप्रतिपन्नेत्यादिनाप
रुपरिकल्पितानुव्यवसायेनागोलिङ्गसाधननानाफलसाधयाद्विवादाधासितेनेति व्यवहारविरहान्न चानुमे
तिविषयकत्वपरादिसंविदस्वत्वं तरसंविवेदनागवायचन रहीतानन्तवच्चेद्यतिसिद्धसाधनस्यात्वदर्थमा

इत्यगोचरसंवेदनविरहप्रयुक्त इति देयं यदनस्य यदनुमानसंवेदनं यत्तदनसंविद्विषयं तदन्तावाप
राधेन यदिदन्तसंविद्व्यवहारहीनानन्तयत्वेति सिद्धसाधनं तस्मान्नेदर्थमात्रेहस्वसमानाश्रयइतिपदे
वदन्तानामयं पूर्वसंविद्विषयं स्मृतिसंवेदनं कालान्तरन्तावितं तदन्तावापराधेन पूर्वसंवेदनस्य व्यवहा
रहीनत्वं नास्त्येवेति सिद्धसाधनं तस्मान्नेदर्थं वर्त्तमानकालवर्त्तिनां स्वसमानाश्रयकालो यस्य गोच
रसंवेदनस्य तद्विरहप्रयुक्तेवेनव्यवहारहीनानन्तवतीत्यर्थः। न चाननन्तरव्यवक्रियमाणसंविद्वि
नाकिं घटसंविद्विषयत्वेनं किं वा घटसंविद्ग्राहकसंविदः प्रथमे दृष्टान्तावः पक्षनिदेपातुसाध्यवैक
ल्याच्च। द्वितीये तु प्रतिज्ञार्थान्तं योर्थघातः स्फुटं एव। अत्रोच्यते। अस्तितावन्नघटसंविन्मात्रवी
तिव्यवहारकाले घटसंविदः स्फुरणानन्तरं वादि संप्रतिपन्नं तच्च स्वसमानाश्रयकालस्वगोचर
संवेदनात्तावेनव्यवहारहीनं नन्तवतीत्यपि संमतमेव स्वाभाविव्यवहारस्यैव तद्व्यवहारतोकेवल॥ ३९
संविद्व्यवहारादर्शनादतस्तस्य दृष्टान्ततायां किमनुपपन्नं न च तत्तु घटसंविदेवेतिपरस्य संमत येन प

नानिक्षेपमर्हतीति नापि तद्ग्राहकग्राहकत्तावेन घटसंविदो न्नमित्यस्मत्संमतं येन प्रतिज्ञाविरुद्धमुद
हरणं स्यान्न च न हि तेषा वगमान्तावेन दृष्टान्तासिद्धिः पक्षनिक्षेपप्रसंगादिति वाच्यं परेणात्मासंवेदन
प्रतिपन्नस्य तत्सिद्धयात्रि बलेन तत्प्रतिदृष्टान्तोपपत्तेर्न च परस्पराश्रयाः तत्तदेवक्तास्तेन नचन: संविदंतर
तेरपेक्षप्रतिज्ञाया विरोधोस्ति चं क्रैकचानुमानाश्च वचनयोरपि विरोधप्रसंगान्न च परस्परत्वान्त
एवं तेदावक्तास: संवेदनमनामस्यसंवेदनं वेबाधकादर्शनादिति वाच्यमित्याह अस्वसंवेदनत्वेपि
त्वादिना। यथा घटसंविद्व्यतिरिक्तासंवित्स्व: घटसंविद्दृष्टान्त: तद्गोचरसंविदन्तरस्य तद्व्यवहा
रेनुपलंतेनान्तावासिद्धेः लोकसिद्धदृष्टान्तावष्टंभेनप्रयोगेविप्रतिपन्नस्तन्यायेन बोधनीयः
इति विशिष्टावक्तास: कुतो न तर्येदित्वनमाहन घविदित इति इदं कथं नूनं विदितमिति वेदनं
नावद्विशेषणं तथा स्फुरति विज्ञाते च विशेषणेविशिष्टावक्तास: संनवनि न ह्यप्रकाशमाने दंडे

इंडी।तिविशिष्टप्रत्ययोदृष्टः।नोविशिष्टावत्तासानुपपत्त्यासंवेदनानांस्वसंवेदनत्वमेवयुक्तमिति
न्यायः।ननुतस्यविज्ञापणस्यसंवेदनांतरेणस्फुरणंनविघ्नमीत्यन्यथाप्युपपत्तिरित्याशंक्याह।ननु
वेदनांतरमितियुक्तिसविज्ञोचरंसंवेदनांतरस्यायोग्यत्वेसत्युपलम्भेननचोपलभ्यते।नन्वदत्ता
वोयसीयतइत्यर्थः।ननूपलभ्यतएवस्वविज्ञोचरंवेदनांतरमितिचेत्तत्राह अनुत्पत्तावेवेतिनतुघट वे
संविज्ञोचरंसंवेदनमनुत्पद्यमानेहत्यतावता तज्जोचरमप्युत्पद्यतेनिकेयंयशामाह।तत्राह आ
यसमानयोगक्षेमत्वाउत्तरविज्ञानानांतुल्यसामग्रीकत्वादित्यर्थः।एतदेवस्फुटयतियावतीत्या
दिना।मूनसासंयुक्तआत्मनिसमवायएवप्रथमज्ञानोपलंभसामग्री।साद्वितीयादावप्यविशि
ष्टेवसर्वज्ञानानामात्मन्येवसमवायात्।अतःतेषामप्युपलंभेननविनत्यनित्यर्थः।ननुघटादिसं ॥४०
विज्ञानस्यसंवेदनंविद्यमानमपिसामग्रीसद्भावेपिनानुत्पद्यतेऽदृष्टवैकल्यादित्याशंक्याह।ननवा

तु
दृष्टस्तिहङ्गतस्यसामग्रीसद्भावावैकल्यादप्युपलंभइतिमशक्यंवक्तुमित्याह।तथाचयोग्यानुपलंभादिति
किंविद्यमानोपिघटोऽदृष्टवैकल्यान्नोपलभ्यते किंवाऽसत्त्वादेवेतिसंदेहादित्यर्थः।तस्माददृष्टमात्र
वैकल्यात्सामग्रीसद्भावेप्यनुपलंभोद्वितीयसंवेदनस्येतिनशक्यंवक्तुम्।इदानींप्रकारांतरेणानुपलं
भंसाधयतितथापीतियद्यप्यदृष्टमात्रवैकल्यादनुपलंभोनघटते तथापिपूर्वसंवेदनंबाह्यार्थगोच
रंद्वितीयंचांतरसविज्ञोचरमित्यवांतरवैलक्षण्याद्विद्यमानस्यापितस्यानुपलंभोघटतेयथा
ग्राह्यकालीनःस्यात्मनिसमवायतुल्यत्वेप्युपलभ्यतेसाप्युत्तरक्षणनोपलभ्यतेतद्वदित्यर्थः।दृष्टांतंविघ
टीतिक्रियाविशेषणेपनपारहरतितत्रवेन्नामनितत्रदृष्टांततथात्वेन्नामविद्यमानस्यापित्वयत्नस्या
नुपलंभोनास्तिवेन्नामयादितेनविनानुपपद्यमानंहस्तचेष्टादिकार्यमस्तिकार्यदर्शनेनतस्यावश्यक
ल्पनीयत्वात्प्रकृतेतुसंवेदनविषयसंविदंतरव्यतिरेकेणानुपपद्यमानंकार्यंकिंचिन्नास्तियेनत

दर्शनुपलभ्यमानमप्यस्तीति किञ्चेतेन सर्वज्ञ एव पूर्ववादी घटो मया विदित इति विशिष्टसंवेदन
मेवानन्यथासिद्धं कार्यं न हि तेन विशेषणानां न संविदुपलम्भणामन्तरेणावकल्पते । तस्माद्दृश्यवानुपप
स्येवानुपलभ्यमानमपि वेदनान्तरं कल्पनीयं तत्त्वतः । अन्यथाप्युपपत्तिमाह तस्येति विशिष्ट
संवेदनं विशेषणस्फुरणमात्रमपेक्षते न तु विशेषणाद्भिन्नेन तत्स्फुरणेन तदितरेण चेत्यत्र था
पारोक्षितः एवं च विशेषणस्य संवेदनस्य स्फुरणं न विरुध्यतीति न्यायाद् इदानीं व्याप्तिबलेन
भेदं साधयति यद्यपि पदार्थविपरिहरतिनानातीति सर्वस्य घटादेरतिरिक्तवेदनवेद्यत्वं व्याप्ति व
दनबलेन सिद्ध्यति व्याप्तिसंवेदनस्य तु वेदनान्तरवेद्यत्वं न व्याप्यं तद्वेदनेन सिद्धमिति तद्व्या
प्तिसिद्धात् । दृष्टान्तरान्तरमाह किं चेत्यादिना सर्वसंवेदनमस्य संवेदनमिति नैयायिकानां व्या ॥४१
प्तिसंवेदनं सर्वस्य संवेदनस्याव्यसंवेदनत्वं साधयतु स्वस्याप्यव्यसंवेदनत्वं साधयतीति संवे

दनस्य पृथग्ग्राहकस्य च स्मिन्परत्र च साधारणत्वात्तु तस्याव्यतिरिक्ते नाव्यसंवेदनत्वं सिद्धमिति तथा
सर्वकार्यं सकारणकमिति ज्ञानं सर्वस्य कार्यस्य सकारणकत्वं साधयतु स्वस्यापि कार्यत्वाविशेषात्तु
सकारणकत्वं स्वयमेव साधयति तथा सर्वं वस्तु सात्मकमिति व्याप्तिसंवेदनं सर्वस्य सात्मकत्वं सा
धयतु स्वस्यापि सात्मकत्वं साधयति न तु तस्य सात्मकत्वं व्याप्तिवेदनान्तरेण सिद्धमिति कथं य
दुक्तं तद्व्यतिरिक्तवेदनेनासिद्धमिति च यदीयव्याप्तेर्नयति चारपरं परापि तु त्वदुक्तत्वेऽनर्थः । तेषां नसा
हात्म्यगोचरत्वमित्याह परं गोचरत्वं त्वेवेति सिद्धान्त्याह घटसंवेदनमपीति स्तु न पूर्ववाद्याह स्व
परसाधारणादिति तस्मिन्नु परत्र च साधारणत्वं प्रदर्शितमिति निर्भिन्नसंवेदनं चादितः दर्शनस्वगोचरत्वं व्या
प्तिसंवेदनेषु दृष्टं न तथा घटवेदने साधारणत्वं निमित्तमस्ति येन स्वगोचरत्वमपि स्यादि
त्यर्थः । परिहरति नास्याव्यर्थमात्रत्वादिति विवक्षितेऽर्थे शब्दः स्वीदृष्टान्तिकभावो भवतीति ते च

वेदनत्वस्य प्रयोजकस्य रूपस्य व्यापित्वं विकल्पनिरपेक्षसिद्धिं चेद्विषयत्विनोक्यास्य यानुवेलक्षण्यमात्रं शां
कितं न तावन्नाशस्य तद्दृष्टांतिकत्वावस्ततिरिक्त्यर्थः । उक्तं हि किं हि विज्ञायमप्यनुपसंहारसिद्धं वैधर्म्या
दप्रतिबंध इति अथ दृष्टांतदार्ष्टांतिकयोः सर्वथा साम्यं वक्तव्यमित्यत्र प्रायः । तत्राह सर्वथा चेति
न हि घटवदनित्यः शब्द इत्युक्ते घटवत्सावयवत्वापि नव चेति सम्यगुक्तं सर्वपा च साम्ये दृष्टां
तदार्ष्टांतिकभावोपि न स्यादिति भावः । ननु व्यपरसाधारणमेकं प्रयोजकमंतरेणापि यदि स्वप
रयोः प्रवृत्तिः कस्यचिद्दृष्टास्यान्तदा ये धर्ममात्रं तदिति वक्तुं शक्यते न च तदस्तीत्याशंक्याह प्रदी
पवच्चेति एतदेव स्फुटयति यथा स्वस्मिन्नित्युक्तार्थसंवादकमाह नन्वयोः कामिति एकं ज्ञानमेवांतरं वो
ति कस्यचित्प्रदीपादेः प्रकाशकं अन्यस्य घटादेः तद्रूपमेव मानमंतरं च यथा विनैव प्रकाशकं नैक ॥४८
रूपमेव सर्वस्य प्रकाशकं किंतु वस्तुस्वभाववैचित्र्यादात्मपरव्यापनपरस्य विज्ञानस्यापि तद्व्यदेवं चस

व

वोति तद्व्यापिन्या व्याकृतेन चाधानयदेवं न तदेवं यथा शृंगमिति यदि सोपि केवलव्यतिरेकिणं ना
नुमन्यते कथं सत्वेन क्षणिकता विश्वस्य बोधयेत् नो खलु यत्सत् तत् क्षणिकमिति संमतोस्माकमन्वयलेशः
जलधरादेरपि पूर्वापरमनक्षणिकतानुरूपभावान् परस्य हि पूर्वापरकालकलाविकलता क्षणिकता न
तादृशी जलधरादेस्तद्रूपमप्यते किं त्वाशुतरविनाशिता तस्ते नापि केवलव्यतिरेकिणा यतु क्षणिकं न तद्वाति
न तत्सद्यथा शशशृंगं संतश्चामी भावा इत्यनेन क्षणिकता प्रबोधनीया तस्मात्सर्वैरेव केवलव्यतिरेकी स्वी
कर्तव्य इति स्थितं मुक्तमेव केवलव्यतिरेकिणा स्वप्रकाशत्वसाधनेन नन्वदृष्टमन्यार्थत्वेन बाधकमनुपन्य
स्तं नाप्रयोजकत्वपरिहारायेत्याशंक्याह तदर्थमेव चेति यद्यप्यन्वयव्यतिरेक्यनुमानानुग्राहकत्वेन
पूर्वतर्क उपन्यस्तस्यापि केवलव्यतिरेक्यनुमाने प्रयोजकत्वपरिहारार्थमपि स्यादित्यभिमतविशेषस्य स्वसंवे
दनत्वपरिग्रहेणैव तद्बाधकं प्रदर्शितमस्माभिरित्यर्थः संवेदनत्वं चेत्यादिना च फलितमाह तस्मादिति तु
र्कोर्थपदमवतारयति एतादृशस्येति विज्ञानस्य प्रकाशतद्रूपयोरद्यापात्ताव्यप्रकाशकत्वानैकांतिकतास्त्वे
नो

तादृशस्य सर्वस्येत्यर्थः विज्ञानमात्मस्वभावो न त्वतिविनाशित्वानुपपत्त्यादिस्ताह कथं पुनरिति हेत्वसिद्धमाप
दिस्यति न विज्ञानस्येति अयमाशयो विज्ञानस्य विनाशः किं स्वतः सिद्ध उत किं वा ज्ञानान्तरेण न तावत्तेनैव तत्
सत्ताकाले तस्याभावात् नाप्यन्येन संविज्ञग्रहणमन्तरेण तद्विशेषितविनाशग्रहणानुपपत्तेः संविदश्च
न संविदन्तरेण ग्रहणं संभवतीति प्रतीतिसिद्धो विनाशो न तर्केण पलपनीयः यदुक्तं नीलादिसंवेदनं
त्वादिना नीलादिसंवेदनसमकालं पीतादिसंवेदनं न दृश्यत इति कोऽर्थः किं पीताद्युपरागो न दृश्यते उत किं
वा संविदपि न तावत्संविदन्तरस्य तेन नीलोपरागकालेऽपि तत्स्फुरणात् पीताद्युपरागादर्शनं त्वभ्युपगम्यत एव तथा
हि पीतादेरित्यादिना यात्तु पीतसंवित्त्वेति प्रतीतिः सा केवलघटाकाशो न दृश्यत इतिवदौपाधिकत्वेनापि न
विरुध्यतीत्याह विनाशप्रतीतेरपीति ननु प्रमाणान्तरेणाकाशस्य घटादेः सिद्धत्वाद्विनाशप्रतीतिर्मिथ्या ॥४५
विनाशयिजयेति कल्पयितुं शक्यते न तथा संविदः प्रमाणमस्तीत्याशंक्याह अनतश्चेति गौरि

नियतं संवित्संविदिति प्रत्यभिज्ञानतः पुंसः संवेदनेनैवानुपलम्भात् प्रत्यभिज्ञाप्रमाणेन व्यक्त्यैक्यसि
द्धिरित्यर्थः संविदश्च प्रत्यभिज्ञायमानत्वं नाम स्वप्रकाशत्वान्न तदुपाध्युपरागभेदेऽप्याकारस्य परिस्फुरणान्न
यानिद्रयं ... ननु प्रत्यभिज्ञायाश्च प्रत्यभिज्ञाविदेयसामान्यविषयत्वाद्व्यक्तिनिरूपाधिकसंविदाक्षिप्ते
दप्रमाणतायाः तदसावपि सामान्यविषयत्वकल्पनायां घटाकाशादिष्वपि प्रसंगात् संविद्भिन्ना निरस्त
सामग्रीसाध्यत्वाद्घटादिवदित्यनुमानेन प्रामितासिकभेदसाधने सिद्धसाधनता यस्त्वभेदसाधने
कुपाकाशादावनैकान्तः श्रोत्रादिव्यापारस्य चानित्यत्वप्रयत्नैर्नापि संतवादित्वं अनुमानमपि बाल्यव
यत्रैकत्वदर्शयति प्रयोगश्चेति यां तर्गणिकरूति खगतयास्तवन्तेदम्भन्यत्यर्थः फलितमर्थमाह स्तोके
न एवं चेत्यादिना एवमनुक्तप्रकारेण प्रत्यभिज्ञया अनुमानेन वा नेदस्य संविदभेदस्य संसिद्धौ सत्यामात्मनः स्य
संविदश्चानत्वसं तथा तत्स्वप्रकाशत्वमविचार्यमिति सिद्धं स्वप्रकाशत्वेऽवासिद्धे किं फलितमित्याशंक्याह

तथा चेति तत्पापीयानित्यादि स्पष्टार्थः॥ नन्वेतादृशमपि दृश्यत्वमात्मनो विद्यत एवाद्वितीयादित्यत आह स्वात्मनि रोक्ति
दर्शनापेक्षानियमादित्याशंक्याह नचौपाधिकात्मविकल्प इति। अद्वितीयत्वं नाम द्वैतात्यन्ताभावोपाधिकं
रूपं स्वप्रकाशात्मप्रकाशात्तेदत्यन्ताभावोपाधिकरूपं तत्प्रतीतावेतत्समर्पकप्रमाणापेक्षायामपि स्वरूपमा
त्रस्य च स्वतो न प्रमाणापेक्षास्ति सुषुप्तादौ तद्व्यतिरेकेणापि स्वरूपस्फुरणादतो न दृश्यत्वहेतोर्व्यभि
चारः स्वरूपे वृत्तिरित्यर्थः। ननु द्वैतात्यन्ताभावविशिष्टमात्मानं यद्यागमेन वेद्यं तर्हि स्वरूपमवश्यं वेद्यमेव
वक्तव्यं न हि स्वरूपे दृश्ये तस्य विशिष्टमवगन्तुं शक्यमित्याशंक्याह विशिष्टस्फुरणेपि चेति। अय
मर्थः आगमादनुमानाद्वा द्वितीयत्वाद्याकाराबुद्धिवृत्तिरुत्पद्यते तस्यामविषयत्वादृगात्मा स्वात्मा
द्वैतात्यन्ताभावविशिष्टत्वमपि साधयतीति स्वरूपे दृश्यापि विशिष्टं मिदृश्यमिति॥ नन्वात्मनो दृश्यत्वमे ॥४५
वात्र विस्तरेणोपपादनीयं तद्व्यतिरेकेणानैकान्तपरिहारासंभवादित्याशंक्याह अन्यथापि चेति साध्य

स्यानैकान्तिकतापरिहारस्याचान्यथापि स्वप्रकाशविज्ञानाभेदेन स्वप्रकाशत्वसाधनेनापि संभवति तथा चे
त्यर्थः। इदानीमप्रयोजकत्वमाशंक्य परिहरति श्लोकेन जडता दृश्यता चेत्यादिना सत्यस्यैव प्रपंचस्य जड
ता दृश्यता चास्मानं बाधकं न माया च विपक्षबाधकतर्काभावादप्रयोजकहेतुरिति चेन्मतं नैवं वाच्यं सत्यत्वे प्र
पंचस्य संविदा संबंधासंभवेन सत्तायां धर्मिणोऽप्रपंचस्यैवासिद्धिप्रसंगादित्यर्थः। तदेव धर्मिणोऽसिद्धिप्रस
ंगापि जडस्य दृश्यत्वे सत्यत्वेन न विरुध्येते इत्याशंक्याह द्वितीयश्लोकेन यस्य ठीत्यादिना ननु न हि संवि
द्बंधव्यतिरेकेण पिंडस्य प्रमाणादेव सिद्धिर्न विरुध्यतीत्याशंक्याह न च तत्र संबद्धमिति जडस्य सिद्धि
र्नाम संविदः संबंध एव स्वातान्त्रिकस्फुरणासंभवात् ततो न संविदा संबद्धं जडं न सिद्धं नाम स्यादित्यर्थः। असि
द्धिमेवोपपादयति तेन स्वभित्यादिना संबंधानिरूपणमेव प्रकटयति न हि संविज्जं वेद्ययोरित्यादिना तान
तावत्संयोगः संयोगस्य संविदो द्रव्यत्वात् नापि तादात्म्यं द्रव्य कथं न वहिस्रयोश्चादनुपपत्तेर्नापि समवायः

आत्मैकगुणत्वात्तिमतस्तस्य घटादौ समवायायोगादित्यर्थः॥ विषयविषयिभावएवसंबंधोऽस्तु तयोरित्याशंक्याह
विषयविषयिभावोपीति कानुपपत्तिरित्याशंक्याह न ह्यसतीति संबंधो हि नित्यसंबंधिपरतंत्रएव न तु तत्सं
बंधमात्रवेकपृमसोऽनवदित्यर्थः॥ ननु वर्त्तमानेन तावद्विषयविषयिभावोऽपि नित्यवर्त्तीनादित्याशंक्याह
न चसंविदसंस्पृष्टं चेतिसंविद्भूत्वं यत्रातिरेकेणापिसिद्धोऽस्य सर्वस्य सर्वार्थसिद्धिप्रसंगादित्यर्थः तर्हि जन्य
जनकभावएवसंबंधोऽस्तु कर्मकारकतयाविषयस्य जनकत्वादित्याशंक्याह हेतुमद्भावश्चेति अवि
घमानस्य जनकत्वानुपपत्तेरित्यर्थः॥ किंच चक्षुरादिभिरपि रूपादिज्ञानानां जन्यजनकभावोऽपि नवा
स्तिसंविद्भवेद्यपृष्टे तावद्यत्याह सत्यतिचारश्चेति घटप्याकुःसांख्याः गुणानुद्भिन्न प्रतिबुद्धान्नायेनावि
षयत्वाद्गामुद्धि तज्ञानहारेणविषयस्यांतःकरणप्रविष्टस्य चिद्रात्मनोपलब्धिः संनवत्येकांतःकरणसं ॥४८
क्रांतिलक्षणसंबंधादिति तदप्यतीतानागतसंबंधासंगतेन प्रदर्शितेन परास्त मित्याह एतेनेति नचमीतायां

कारणेतस्यापि सर्वं विषयतत्त्वाशंक्याह सर्वेवेति श्रयं भावः श्रतीतत्वं नामातीतकालावृत्तित्वं तच्च तेनवाच
छेदकं तत्करणावृत्तितस्य सद्भावोऽनागीविशेषणस्य चातीतकालस्येदानींसद्भावे वर्त्तमानत्वापत्तिनातीत
त्वादिकं स्यादिति अतीतार्थविवृत्तेतोऽनागतार्थविवृत्तेइत्यादिप्रयोगोऽप्यविचारितसंसिद्धएवास्माक
मुपपद्यतेनत्वन्यथा अत्तिमानिनोऽनिरूपणासंभवादिति द्रष्टव्यं किं वर्त्तमानेऽपि घटपिविषयस्यांतःकरणा च
नुप्रवेशः संभवति न चापि चैतन्यस्यांतःकरणानुप्रवेशः संभवतिकूटस्थत्वादित्याह संक्रियतेति चै
तन्यस्यांतःकरणप्रवेशः संक्रमणं न संभवतीत्याह पूर्ववादी चैतत्करणस्यैवेति सिद्धांती एकतिश्रयेतिवर्हि
केयं तच्छायतानाम किं परमार्थतोंतःकरणस्य संविद्रूपता किं वा दृष्टैव तथा प्रतिभासिता आद्यं द्रूषय
तितन्नतावदस्मनो चिद्रूपस्यांतःकरणस्य तादात्म्यं चिद्रूपेचं पारमार्थिकं संभवतिविरोधादितिद्वितीयं द्रूष
यतिश्रुनाचिकेतुनादात्म्ये तत्करणस्य चिद्रूपत्वे सुनितान्निबंध नेकांतःकरणसंक्रांतिलक्षणसंबंधयथानाचि
केसनिनपरमार्थतोदृश्यदृश्ययोर्हृदयनाहितामदर्शनसबद्धतान च पारमार्थिकः संबंधोऽस्तीत्यर्थः॥ तस्मात्स

स्य चेत्रूपं तस्य संविसंसर्गानिरूपणाद सिद्धिरेवेति सिद्धं । प्रपंचस्यासत्यत्वे वाक्यार्थसंबंधसिद्धिरित्याशंक्याह
असत्यत्वे चिदितिकार्थ्यानुगुणत्वे न तु न रपि पृष्टमयवनार्यानिर्दण्द्युदितमित्यादिना अथैवमपीति स्यष्टार्थः
कुत इत्याकांक्षायामाह ज्ञानमात्रस्येति प्रतिविंबेनाथाह तस्य ज्ञानमात्रस्याविंबकगमकत्वं चेत्तद्घाति प्र
संगः स्याघटादिज्ञानानामपिविंबगमकत्वप्रसंगात्प्रतिविंबेनाथाह तत्रयाविशेषादित्यर्थः । अथैतद्दो
षनीत्या प्रतिविंबेन विशेषितस्य ज्ञानस्य गमकत्वं तत्राह विषयावच्छिन्नस्यापि निज्ञानस्य मवनु ज्ञान
प्रतिविंबस्येव विंबगमकत्वान्नसत्यस्येव गमकत्वं नियम इत्यर्थः स्वरूपेण मिथ्यात्वेपि सत्यवस्तुगम
कत्वं प्रामाण्यं चतेसंतवत्वीत्यनेन शंकांतरमप्युत्थापितमित्याह एतेनेति ॥ आ एवं नावहेतु प्रपंचस्य
मिथ्यात्वोपपादनेन प्रत्यक्षादिविरोधपरिहारेणाक्रान्तद्वितीयवस्तुनि प्रामाण्यमुपपाद्येदानीं कार्य ॥४७
परस्पराशंकापाकरणेन तदेवोपपादयति प्राभाकरमतमाह यस्त्वेवमपीत्यादिना यस्तु मन्यते तं
प्रत्ययः किं मन्यत इत्याकांक्षायामेवमपि यद्यपीत्यादिना प्रामाण्यमुपपादितं तथाप्यसति कार्यान्वये

नसंगतत्वमिति रवस्य अत्र प्रामाण्ये वेदांतानामित्यन्वयः । कुत इत्याकांक्षायामाह शाब्दानामिति अ
यमर्थः तत्र मस्त्व नंदयद ग्रामानयेति प्रयुक्ताच्छब्दश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य पार्श्व
स्थो वालोनुमिमीते स्यैयं प्रवृत्तिः प्रवर्त्तकज्ञानपूर्विका स्वतंत्रप्रवृत्तित्वान्मदीयप्रवृत्तिवत्तच्च प्रवर्त्त
कं कार्यज्ञानमेव स्नानतोज्ञातादित्येवं व्यवहारे वाले नावगतमिति आत्मदृष्टांतेन मध्यमवृद्धस्यापि तदेव
कल्पयति शाब्दान्वयव्यतिरेकाभ्यां विषयितया च तज्जनने सर्वशब्दानां तु पदत्वं तत्त्वं तु कार्यान्वितस्वार्थ
नियतं सामर्थ्यं च तत्त्वविप्रतिकादोषः तथा च विपक्षबाधकाभावाद प्रयोजकत्वाशंकामाह विपर्यये त्विति
दिना विपर्यये त्विति कार्यपदानिरिक्तानां सर्वपदानां कार्यसंसृष्टस्वार्थसामर्थ्यनियमास्फपगमे सति
प्रयोजकत्वविधसंगीकारगौरवप्रसंगो बाधकतर्कः स्यादित्यर्थः । न चैकस्मिन्प्रयोजके संतवति
तद्वैविध्यांगीकरणे गौरव दूषणं तत्त्व नितवैकं प्रयोजकं संतवतीत्याशंक्याह योग्यतरानिति इदानीं
कार्यस्य समस्तपदस्यासामर्थ्यव्यावर्तकत्वं व्यावर्तयितुं प्रयोगान्तमोहयद इत्यादिना कार्यसिद्धार्थयोस्ता

वत्वान्नाकरेणान्वयः स्वीक्रियते तयोरन्यतरकार्यं धर्मिसमस्तपदसामर्थ्यस्यप्रतियोगित्वेनपर्यावर्त्त
कंनत्वतिष्ठेद्वयादन्यत्वाद्यदन्वयादन्यन्नतत्समस्तपदसामर्थ्यप्रतियोगित्वे तदः सिद्धपदार्थ इत्यर्थः
पदत्ववक्तव्यं नतुक्रमन्यात्रेवइत्यादिविपरीतबाधकमाहभ्रमापीतादिनाशुक्लागामानयनीलमुत्प
लमित्यादौसत्यसतिचकार्ये योग्यतामात्रेणक्रियया कारकाणां विशेषणस्य चविशेष्येणान्वयेसत्यवे
सतिकार्येणैवसर्वपदार्थानामन्वयात्कार्यान्वितस्वार्थाभिधानेएवसामर्थ्यमितिनियमकल्पनेगौरव
कृपणमित्यर्थः। इदानींयोग्येतरान्वितस्वार्थेशक्तिसाधनायप्रवृत्तो यद्वेत्यादिनाकार्यातिरिक्तान्स
र्वोपिसिद्धपदार्थोयोग्येतरान्वितइत्येवादाभ्यसितउच्यतेउत यान्नितरत्वमेयवदितिद्विशदि
शब्दार्थावेयकार्यंवदित्यर्थः। प्रमेयत्वं नवक्तुयोग्येतरान्वितस्वार्थस्यकल्पनीयविषयत्वं नत्वविधित्वमिति
किंतुकार्यान्वितस्यैवशब्दशक्तिविषयत्वमित्याशंकामाहविपर्यये थित्याइत्येतावदर्थमात्रज्ञानाद्वास्तु॥
प्रवृत्तेरनुपपन्नयोग्यत्वं स्वस्वपदार्थज्ञानमनुमितेनतिवाक्यस्य चशब्दानयथालिरिकान्तुविषयितया

सामान्येनप्रथमंतत्रसामर्थ्यमंगीकृत्यपश्चाद्युक्तेनयोग्येनसंसृष्टस्वार्थाभिधानेपदानांशक्तिरितिवी
त्तायांकार्यस्यसर्वत्राव्यभिचारमात्रेणचयानुकार्यान्वितेशक्तिः परिकल्प्यते तर्हिलोकेसर्वत्रप्रमवर्यस्ये
वाव्यभिचारात्सदन्वितस्वार्थसर्वपदानांसामर्थ्यमेवयत्तु तद्वाचकोदाजहत्यनस्ताउतथाचवेदइतिनतु
योग्यतावधिरूपकार्यान्वयस्यप्रयोजकत्वोपादानेबकुविशेषणत्वमापाद्यतेकार्यान्वयमात्रस्यप्रयो
जकत्वोपादानेतुलाघवं नहि ततोपिलघीयोन्वितत्वमात्रस्यैवप्रयोजकत्वमुपादीयतां योग्यत्वेतस्ययो
ग्यपलक्षणत्वान्तत्रप्रयोजकविशेषणत्वमितिद्रष्टव्यं तस्माल्लोकेनसमस्तपदानांकार्यान्वितस्वार्थेनु
सामर्थ्यग्रहणंकिंत्वन्वितस्वार्थमात्रइति सिद्धं तांनयचिदंलोकेवेदेतुसिद्धेर्थेनास्त्येवमुख्यवाक्यस्याप्रमा
ण्यमित्याशंक्याहएवंस्थितेसिद्धपीत्यादिनाविपरीतबाधकमाहविपर्ययेचेतितुल्यासंगवेनलक्षणा
प्रयोगस्तुष्वतेसंगवेत्विचेतिइयोग्यान्वितस्वार्थसामर्थ्याभिधानानुरूप्याद्वस्याप्रामाण्यंतस्मिन्सतिलक्ष
णंचवाचकमित्यर्थः। ननुसर्वस्यैववेदस्यालौकिकेनियोगेचोदनास्तत्वेप्रामाण्यंस्थापितंतत्कथंसि

प्रसंजयति विरोधादित्याशंक्याह एतेच्च पराप्तिमतमिति ननु पराप्तित्वलोर्थः सिद्धउच्यते अमांतरगोचरो
वा तत्र प्रामाण्यप्रसाधने निरिच्छमेघोदयदर्शनाद्वृष्ट्यनिवृष्टिः रितियदनुमानं तत्रानैकांतिकंस्यादि
त्याशंक्याह पराप्तिमतकार्यइति कालत्रयानवच्छिन्नप्रयत्नैकं पराप्तिमतकार्यं तद्विपरीतेनविप्पदनु
मानस्यप्रामाण्यादित्यर्थः। ननु तथापिस्तानेबाधितविलयं चविधिवाक्यत्यागस्यपराप्तिमते कार्ये प्रमा
णत्वादिसाशंक्याह नपीति ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यनेन स्वर्गकामस्य ज्योतिष्टोमो भिलषित
साधनमिति प्रतिपाद्यते न नियोगः प्राप्तिलषितसाधनत्वज्ञानादेव प्रवृत्तिरपि संभवतीत्यर्थः। विधित्वा
गस्य नियोगानियोगनित्यचारूपगमेव प्रामाण्यमेवोपपद्यतइत्याह विपर्ययेत्वित्यादिना अयमर्थः प्र
तीतेतावत्कार्यसंगतिग्रहो वक्तव्यः कार्यप्रतीतिश्च न प्रत्यक्षेण तस्य वर्तमानत्वाभावात्सत्वात्प्रत्युमाने
न तथाप्यालिंगाद्वा वाक्याच्चार्थापत्त्या न व्यतिरेकेणानुपपद्यमानाभावात् प्रवृत्तेश्च कृतिविषयेष्टसाधन ॥४९
त्वादेव संभवादुपमानस्य च सादृश्यमात्रोपपन्नत्वात्तस्मात्पराप्तिमतेन कार्यप्रतीतिकारणाभावाद

प्रतीतेश्च संगतिग्रहायोगादगृहीतसंगतिकानां च शब्दानां बोधकत्वासंभवादप्रामाण्यमेव प्रसज्यतेइति ननु
यद्यपि बाह्यप्रत्यक्षत्वाद्युपपद्यं तस्य नोपपद्यते तथापि मानसावसेयेतस्मिन्नुसंगतिग्रहो न विप्रतीत्याशंक्याह
न च ममेदं कर्तव्यमिति ममेदं कर्तव्यमिति नेदं यदि प्रमाणज्ञानं स्यात्तदा प्रमाणप्रसादाद्भवेत्तं मे यदि प्रोप्रमि
ति नेत्थिदं प्रमाणज्ञानं किंतु चिकीर्षालक्षणोभिलाषएव इत्यर्थः। ननु चिकीर्षापि न संभाव्यते व्यतिरिक्तका
र्यज्ञानं विना तस्मादन्यथानुपपत्तिरेव प्रमाणमित्याशंक्याह चिकीर्षायाश्चेतिश्चेतिलौकिककार्यज्ञान
कारणत्वेन त्वया स्वरूपगतं यत्कृतियोग्यश्रेयःसाधनज्ञानं तदेवचिकीर्षाया अप्युत्पत्त्युपपन्नो संभवत्यां
न चिकीर्षात्यस्यार्थमपि कार्यज्ञानमस्वरूपगं तथ्यमित्यर्थः। तत्कृतिताविषयं [illegible] रूपं कर्म यत्कार्यं तावदुक्तं
फलसाधनतातत्र कारणं तेन कार्यतानिकिंचकिंलक्षणं तत्तु कार्यं यत्कर्तव्यबुद्धेर्गोचरः। किंचनियोग
तामात्रलक्षणं क्रियाकलापत्वदृश्यतालक्षणं प्रथमं प्रत्यादलानुयोग्यतामात्रस्यचिकीर्षादिमानत्वलवि
योग्यतातिरिक्ता कलापत्वदृश्यातयकार्यलक्षणं न चेदं मानहीनं कृतिर्हि प्रपन्नः फलतःसाध्यं नं चाह

(58)

श्यज्ञायत इति मनस्साऽवसीयत एवेत्याशंक्याह कृत्स्नेत्यादेश्यतान्वित्यादिना फलतत्साधनयोः कृत्स्नेदृश्यता
नामचिकीर्षागोचरत्वेन चकास्तीत्यर्थः। चिकीर्षातिरिक्तानत्र कृत्स्नेदृश्यतानातीत्यत्र च प्रमाणं तनाम्नी
त्यद्व विपर्यये प्रमाणस्येति न व्यतिरिक्तामयानुकृयत इति मदाक्ममेव प्रमाणमित्याशंक्याह वाक्या
त्रस्य चेति प्रकृतमुपसंहरति तस्मादिति यच्चित्यादि स्पष्टार्थः। विस्फुरु पांशुयष्ट्यद्दत्यादि वदत्यस्या
यमर्थः। नानिचाहतघट्टेक्रियते यदश्वे वो गुरोडाशाभु पांशुयाऽजमनूयायतानिविस्फुरु पांशुयेष्ट्यो
ज्ञानिचाय प्रज्ञापतिरु पांशुयष्ट्यो नानिचायोत्यत्र नानिचा ज्ञानिचोपक्रमोपसंहारैकरूप्यावग
तोपांशुयाग प्रतिपादकपरे वाक्ये सति यथा मध्ये श्रूयमाणो विस्फुरु पांशुयष्टव्य इत्यादयो न विधय इ
त्यावाक्यभेदप्रसंगात तथात्रापि मनस्कैका मायसर्वं प्रियं तवती त्याम प्रतिपाद्यते नोपक्रमादेताव
दरे खल्वमृतत्वमित्यपसंहारादेकस्मिन्नात्मप्रतिपादनपरे वाक्ये सति वाक्यभेदप्रसंगायतद्र ॥५०
हस्कवल्मस्यो विषयप्रश्नः किं चेहेत्युत्तरं च श्रुतिस्मरणादर्शयति नार्थवादतया व्याख्यात

या इति॥७॥ उत्कार्यज्ञानफलं श्लोकेन संगृह्णाति यस्मादात्मतत्त्वमात्मयेन तत्प्रत्यक्षादिविधिभेदैर्नावगम्य
नापि कार्यशेषतात्स्मादित्यर्थः। अद्वैतं च तद्विज्ञानं च तत्स्वरूपं च तत्रास्मिन् ब्रह्मणि वेदांतानां प्रामाण्यं प्र
तिपद्यंत इत्यखंडवाक्यार्थत्वकृतिमत्वादेति न आह्निपत्ति श्रयेवमित्यादिना न च साध्यविकलदृष्टांतः श्रा
मनःस्पष्टार्थः। ननु दध्यु बुभुक्षादिराकारो घट इत्यनेनापि दध्यु बुभुक्षादिपत्ति विशिष्टएव घटो बोध्यत इ
तोऽखंडार्थत्वाभावात्साध्यविकलो दृष्टांत इत्याशंक्याह न च साध्यविकल इति घटमानयेति कार्यदृष्टे
य घन्यएव विशिष्टार्थः प्रतिपादयते न तु पृथानतुरूपत्वादत्रुपादेयवचनत्वमेवस्यादित्यर्थः। ननु त
र्हि दध्यु चादीनां घट प्रतिपाद्यकार्थत्वात्प्रयोपतेवस्यादित्याशंक्याह न च दध्यु चादिकर्मानिवृत्तिनिमि
त्तभेदमंतरेणैकस्मिन्नर्थे वृत्तिः पर्यायतार्थैर्यापिकृतेतु प्रवृत्तिनिमित्तभेदसंभवान्न पर्यायतेत्यर्थः। न
र्हि कथमखंडार्थत्वात्लान्तइत्याशंक्याह न थापीति अपर्यायत्वे सति तुल्यपाद्यत्वात्सामर्थ्ये प्रज्ञानतुरूप

वेन संगच्छत इति सा च कुत्वादिति जनेनैकत्वघटप्रातिपदिकार्थे उपलक्षणरूपैः पदार्थैरुपलक्षणीयत्व-
त्वेनाखंडार्थतासिद्ध्यतीत्यर्थः॥ दार्ष्टान्तिकमाह एवं विज्ञानानंदादिवाक्येपीति अयमर्थो विज्ञानशब्देन
नाम विज्ञानत्वापरसामान्यमुच्यते तथानंदशब्देन चानंदत्वापरसामान्यमुच्यते ततः प्रवृत्तिनिमित्तभे-
दान्न पर्यायता नाप्यखंडार्थतानुपपत्तिः विज्ञानत्वव्यवच्छेदेन लक्षिताया एव व्यक्तेरानंदपदेनाप्य-
नानंदत्वव्यवच्छेदेन लक्ष्यमाणत्वान्न तु संबंधमनुपपत्तिः स्वालक्षण्यावर्त्तते सत्यमिति अपि विधने संबं-
ध आध्यासिकः कस्याश्च प्रकाशस्वरूपव्यक्तेः परापरसामान्याध्यारोपादनुपपत्तिरप्यस्ति मुख्यार्थप-
रित्यागे लक्षणाप्रातिपदिकार्थस्यानुबोधयितित तस्यास्तत्वादिति मुक्तेवलक्षणाविपक्षे बाधकमाह यदिप-
देष्वपि एवं तावत्पदांतरवाक्यस्याखंडार्थत्वमनुपपाद्येदानीं महावाक्यस्याखंडार्थत्वमाह द्वितीयेपीत्या-
दिना समानाधिकरणवाक्यस्याखंडार्थत्वे साध्ये नीलमुत्पलमित्यादौ व्यभिचारः स्यात्तत्र गुणगुणिनोरा- ॥५१
नंदस्य विद्यमानत्वान्न पदव्यवच्छेदार्थमात्र व्यावृत्तेः समीति एवमपि परिहरणं उत्पलमित्यादौ व्यभिचारः

स्यात्तदर्थमाह कार्यकारणात्मक इति न तु सोयं देवदत्त इत्यनेन तद्देतद्देशकालविशिष्टो देवदत्तो बोध्य-
ते तत्साध्यविकलो दृष्टांत इत्याशंक्याह न चेत्साध्यविकल इति तद्देतद्देशकालोपलक्षितो देवदत्तस्तद्दे-
तद्देशावेदकतत्तेदंताभ्रमनिराकरणेन परस्मै प्रतिपाद्यते न तु विशिष्ट इत्यर्थः॥ ननूपलक्षणविशेषणयोः
को भेद उच्यते विशेष्यव्यापसर्जनताप्रतीतिमुत्पाद्य तस्य व्यावर्त्तकं विशेषणं यथा दंडी देवदत्तस्य विशे-
ष्यानुपसर्जनतया तस्यान्यतो व्यावर्त्तकमुपलक्षणं यथा काकोपलक्षितस्य तिन नु तद्देशादिमत्वमेव कस्मान्न प्र-
तिपद्यते तत्राह अपरस्य तत्र इति तद्भ्रमान्तर्निवृत्तिरेकेणापरस्य कस्यचिदपि विशिष्टाशस्य बोध-
यितुमिष्टस्य तत्रासत्वाद्विशिष्टयोरित्यन्वयादित्यर्थः॥ न तर्हि स्वमेव देवदत्तस्याज्ञानेन न हि ज्ञाप्यते न तु
तेदन्त्रमनिवृत्तिः प्रमाणफलमित्याशंक्याह एकत्वस्यापीति पदार्थानिरासमयत्वे वा सहत्वादित्यर्थः॥ न
तु तेदत्वभ्रमनिवृत्तिश्चेत्प्रमाणफलं तर्हि द्वितीयस्य तेदन्तायस्य प्रतिरासान्नाखंडार्थता सिद्धिरित्याशंक्या-
ह आरोपितत्वनिरसनेनैवास्मासि त्वदैतो नास्यपगम्यते नतु कल्पितेनापीत्यर्थः॥ इदानीं दृष्टांतविकल्पयतितत्र

मप्तिवाक्येपीतित्त्वमितिसामानाधिकरण्येन तत्त्वंपदयोर्यौवाच्यावेकत्वमवगम्यते तन्मुख्ययोर्नसंभव
तिसथाहि सातासमायोपाधिज्ञानानंदाद्वितीयं ब्रह्म तत्पदाभिधेयं सदेवसोम्येदमग्रआसीदेकमेवाद्वि
तीयमित्यादिना प्रकृतं तस्य जगत्कारणस्य तदापरामर्शात् त्वंपदेन च समस्तकार्यकरणसंघातोपाधि
संसारिप्रत्यक्चैतन्यमभिधीयते तयोरेकत्वं न संभवति नाप्युतेविरुद्धधर्मकात्तयोः संसर्गएव तयोर्वा
क्येन बोध्यते तदपि वक्तुं न शक्यते मुख्यसामानाधिकरण्यविरोधात् गौणसामानाधिकरण्यप्रसंगात्
भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिर्मुख्यं सामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तानां
शब्दानां नानार्थे वृत्तिर्गौणं सामानाधिकरण्यं तस्मान्मुख्यार्थपरिग्रहेऽनुपपन्ना शबलपदार्था
भ्यां स्वरूपे समारोपितत्वेन संबंधिभ्यामेकं स्वरूपमुपलक्ष्यते तदुक्तमर्थः न कृतं सामानाधिकरण्यं
च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति ॥ भा० इदानीं वर्णितात्मनिरू ॥५२
पणस्य मोक्षफलत्वं दर्शयन्ननेन श्लोकेनेयमानंदरूपायमित्यादिना इदानीं मोक्षस्वरूपं दर्शय

ति कः पुनरस्ति तत्प्रत्यक्षः निरतिशयइति एवंविधश्च मोक्षस्तत्प्राप्त्युपायेऽप्येकोऽनवयतिकिं चाज्ञा
नविद्यानिवृत्तिरेव मोक्षः सचाविद्यास्तमयइति उक्तं हि एकात्म्यापत्तिनिवृत्तिर्याद्यात्मानुभवसंश्रया ...
विद्यास्तमेवीजं तन्नाशोमुक्तिरात्मनः इति न च न निवृत्तिर्यात्रिरसनिवृत्तिः सा कथमविद्यानिवृ
त्तिरित्याशंक्याह न च विद्यातोऽन्यनियम्यमस्ति सन्नैवास्तिवृत्तिः कथं नस्यायाद्ववीस्यादनिवृत्तिर्न
हि प्रकाशस्य तावेसर्विनरिवर्क्ततत्तमः सं नवति कौशिकसमारोपितं तु हृष्टं न वेदाख्यविद्यासमारो
पएवानिवृत्तिरावरणंतन्निवृत्तिरेवयानिवृत्तिरित्यर्थः एते नेदं मपास्तं यदाह कश्चित्तु स्वरूपेण
विद्यमानस्य पश्चादुपलब्धिरस्ति निवृत्तिर्न वेदनसंवेदनस्य सुखस्य सासंते वृत्तिर्विज्ञानांतराविषय
यादिति न च निवर्तयाऽड्डेऽड्डे यावरणपनामएवास्तिवृत्तिरिति पूर्ववाद्याक्षिपति सापि कथमिति च
निवृत्तस्य तावोनन्निवृत्तिर्नेवाविद्या जयनामनायद्वति तावः पद्विहरति ज्ञानिवृत्तिकार्यस्येत्यादिना
ज्ञानिबंधेनामस्य प्रकाशाद्येनानंदाभिप्रकाशाते येनि ज्ञानत्व एवहारस्य ज्ञागत्याय त्विरीकरणे यथा स्यंमुक्ति

52

संयोगे आत्मस्य स्फोटादिकार्यस्य मंत्रादिना प्रतिबंधेनानुत्पत्त्यापि वह्निकारणत्वं अग्निशक्तिकार्यविरोधि
मादन्ति वृत्तेरन्यानन्ते युक्तिरिति परित्यागेन पर्युदासे नाविद्यानन्ते युक्तिशब्दे नोच्यते इत्यर्थः नत्वन्ति
यत्नेरस्ताबोनन्ते युक्तिरित्यतिप्रायेणाह ननु प्रसन्नो निसंविद्रूपे कथमविद्यासंभवति यदि प्रमा
णतो न संभवति तथाप्युपगम्य तदेव पदिश्रनीति तो न संभवतीत्याह पश्य घटं न जानाम इत्याद्यनुभव
विरोधः। अपं च वितं चैतदन्यत्र एवं सुखानान्त विद्यातोरविद्यात्मकत्वं प्रसाध्य समनि दुःखत्वस्याप्यविद्या
त्मकत्वं साधयितुमुपक्रमते दुःखमप्यात्मनीत्यादिना। ईदृते क्रिमानि द्वितीयं वस्तु कारणं नास्तीत्यत्र
प्रमाणमाह द्वितीयाद्वै भयं भवति न च तदस्तीत्यर्थः। नहि कारणं विनापि जायते दुःखं न विषय
नीत्याशंक्याह कार्याणां चेति यस्मात्स्वाभाविकमागन्तुकं वा दुःखं न भवति तस्मादिदं प्रसंसा
रः। आध्यात्मिकं दुःखं ज्वरपीडाद्याधिदैविकं विषव्यपानादि शीतादि वा नाधि आधिभौतिकं वा ॥५३
प्रचोरादिकृतमित्यर्थः। ननु तत्वज्ञविद्यायिवर्णीधर्मोपकल्पितं दुःखमविद्यात्मकमेव तथाप्यविद्या

निरुपाधिकप्रेमगोचरः पुरुषार्थः पुरुषेणार्थ्यमानो यः पुरुषार्थ इत्यर्थः। इदानीं युक्तिरेकस्य पुरुषार्थत्वोप
योगित्वेन ग्रहणं व्यर्थमित्याशंक्य तावता वेति ननु यत्र यत्र पुरुषेणार्थ्यते न तत्र सर्वत्र लोके युक्तिरिकस्यैह
त्वोपि पुरुषार्थोपयोगी स्यादित्याशंक्याह दर्शनकथं तेनिकिं वात्यल्पमानतुच्छमिदं तुच्छत्वे लोके
दस्य दृष्टत्वात्तत्राभाव्येतेदनन्तयितव्यमिति कथमित्यत आह दृश्यत्वमर्थमपीति स्वर्गस्यापुरुषार्थस्यादर्शना
त्मत्वं निर्घटते इत्याह तत्राप्यनुभविकामिति समः समाधिरित्यादि प्रत्यक्षप्रकाशमानमिति तत्कार्थसप्रमा
णं निगमयति तस्मिन्निमेतदित्यादिना आनन्दस्यादिलक्षणोनीत्युक्तिचारः स्यात्तदर्थमननीनत्र नृणांप
रकीयानंदेयुक्तिचारपरिहारायाह प्रत्यक्षप्रकाशमान इति स्वा युवहितनया प्रकाशमान इत्यर्थः। अ
परोक्षतया प्रकाशमानो नेदमित्यादित्यर्थः। विपक्षेदोषमाह अत्यथेत्यादिना दुःखोच्छेदस्य संभवात्पु
रुषार्थत्वं नसिद्ध्यति नत्वत्यं तदुःखोच्छिन्नानामिति इष्टत्वं नानामिति नीत्यागृहीत
नानामित्यर्थः। परिहारः स्पष्टः। नत्वहिरूपेण गतोगस्य नयातविप्यतीति नीत्यातल्पत्यागेन नोहेतुत्व

ते

न्निर्नीविष्यतीत्याशंक्याह नवीनीर्ति तया इति बाह्यार्थं श्लोकेनोपसंहरति तस्मादिति सत्यमोक्षः केवल
ज्ञानरूपः किं वा समुच्चितरूप इति संदेहे सिद्धान्तोपक्रमे ते सर्वायमित्यादिना दृष्टान्तस्य साध्यवै
कल्यं परिहरति नहीत्यादिना ननु तत्र विद्यास्तमयः केवलज्ञानाद्भवति मोक्षे त्ववियास्तमयः केवल
ज्ञानान्न भविष्यतीको दोष इत्याशंक्याह विपर्यये चेत्यादिना यावन्मात्राकारणाद्यादृक् कार्यं दृष्टं
तादृशस्यैव कार्यस्य कारणान्तरादप्युत्पत्तौ तस्य कारणलक्षणं व्याहन्येत तस्मिन्सति तत्त्वयतीति व्यतिरे
काभावादिह च सर्वत्रैवाविद्यास्तमयः केवलज्ञानाद्दृष्टो यदि मोक्षे केवलज्ञानान्न स्यान्नूनं तदा न व्यति
रेकात्मा यद्गतं यदविद्यानिवृत्तिहेतुत्वं तच्च ज्ञानस्य तद्विरुध्यत इति भावः इदानीं मार्गमोऽपि प्रमाणमि
त्याह तद्योऽकमित्यादिना नहि किं स वैधेय कर्मणा ननुपयोग इत्याशंक्याह कर्मणां पुनरिति नियमाहर
णत्रिनीरज्जुसर्पं मन्यमानस्य निकटोपसर्पणलक्षणं कर्मसंप्रयोगद्वारेण तत्त्वज्ञानोत्पत्तावनुपयुक्तं ते ||५५
न यागहोत्रादीनां कर्मणामपि सत्त्वशुद्धिपरंपरया तत्त्वज्ञानोत्पत्तावुपयोगोऽस्त्येव | परंपरयोपयो

ग्रमाणमाह तथा चेत्यादिना न स्वस्थे न ग्रामं गमिष्यतीत्यत्र नाश्वस्य करणस्येच्छयान्वयः किंतु फलेन तथा
त्रापि विविदिषन्तीत्यत्र न वाक्येच्छयानकरणानां यज्ञादीनामन्वयः किंतु फलेन मोक्षेणेत्याशंक्याह स्व
श्वेन ग्रामं गमिष्यतीत्येवमादिवत्त्रापि अश्वस्य गमनक्रियासाधनत्वमेव ननु ग्रामप्राप्तिसाधनत्वं गम
नस्यैव न तत्र निरपेक्षकारणमात्रत्वं यद्यपि विविदिषमाणज्ञानसाधनत्वमेव यज्ञादीनां न तु मोक्षसाधनता ज्ञाते
ति गमकसंगादिति भावः | पंचदशोपस्य निरोहितार्थः ||छ|| अवताहोऽहं यदीव | कमलाकर ईश्वर | सुधासु
रनराकारमस्तु पापी नप कल्लः ||१ अनुभूतिस्वरूपाख्यो यतिश्चक्रे निबंधनं | प्रमाणरत्नमालायामिदं वि
द्वदानंददायकं ||२ शुभं भवतु ||छ|| ||छ|| नमः शिवाय ||छ|| ||छ|| शुभं || ||५६

55

[OrderDescription]
,CREATED=23.10.20 11:57
,TRANSFERRED=2020/10/23 at 12:04:44
,PAGES=54
,TYPE=STD
,NAME=S0004461
,Book Name=M-1243-PRAMAN RATNAMALA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,